## (263) "कै शब्दे" (I-भ्वादिः-916. अक. अनि. पर.)

'शब्दे' इति सामान्यत उक्तावपि शब्दविशेषे प्रयुज्यते ।

[1]कायकः-यिका, [2]कापकः-पिका, [3]चिकासकः-सिका, [4]चाकायकः-यिका ;
काता-त्री, कापयिता-त्री, चिकासिता-त्री, चाकायिता-त्री ;
[5]कायन्-न्ती, कापयन्-न्ती, चिकासन्-न्ती ; —
कास्यन्-न्ती-ती, कापयिष्यन्-न्ती-ती, चिकासिष्यन्-न्ती-ती ; —
[6]व्यतिकायमानः, कापयमानः, — चाकायमानः ;
व्यतिकास्यमानः, कापयिष्यमाणः, — चाकायिष्यमाणः ;
[7]काः-कौ-काः ; — — —
कातम्-कातः-कातवान्, कापितः, चिकासितः, चाकायितः-तवान् ;
[8]प्रकः, [9]कायः, [10]नरकः-नरिका, [11]कानः, [12]ध्वाङ्क्षकायी, कापः, चिकासुः, [[13]चाकः ;

---

1. 'आदेच उपदेशेऽशिति' (6-1-45) इत्यनैमित्तिक आत्वे, 'आतो युक् चिण्कृतोः' (7-3-33) इति युगागमः ।
2. 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग् णौ' (7-3-36) इति पुक् । एवं ण्यन्ते सर्वत्र ज्ञेयम् ।
3. 'सन्यङोः' (6-1-9) इति द्वित्वे, 'सन्यतः' (7-4-79) इत्यभ्यासस्य इत्वम् । एवं सर्वत्र सन्नन्ते बोध्यम् । धातोरनुदात्तत्वात् सन इडागमो न ।
4. 'दीर्घोऽकितः' (7-4-83) इत्यभ्यासस्य दीर्घः । एवं यङन्ते सर्वत्र ज्ञेयम् ।
5. 'आदेच उपदेशेऽशिति' (6-1-45) इत्यत्र 'अशिति' इति प्रतिषेधात् आत्वं न । 'एचोऽयवायावः' (6-1-78) इत्यायादेशः ।
6. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इत्यात्मनेपदम्, शानच् ।
7. आत्वे, सोः रुत्वविसर्गयोः रूपम् ।
8. 'आतश्चोपसर्गे' (3-1-136) इति कर्तरि कः । 'आतो लोप इटि च' (6-4-64) इत्याकारलोपः ।
9. 'श्याऽऽद्व्यधास्रु—' (3-1-141) इत्यादिना आदन्तलक्षणो णः प्रत्ययः । युगागमः ।
10. 'आतोऽनुपसर्गे कः' (3-2-3) इति कर्मण्युपपदेऽणपवादः कः प्रत्ययः । नरान् कायतीति नरकः । स्त्रियां, 'मामकनरकयोरुपसंख्यानम्' (वा. 7-3-44) इति इत्वम् ।
11. 'चलनशब्दार्थादकर्मकात्—' (3-2-148) इति तच्छीलादिषु कर्तृषु युच् ।
12. 'कर्तर्युपमाने' (3-2-79) इति णिनिः । युक् । ध्वाङ्क्ष इव कायतीति ध्वाङ्क्षकायी ।
13. यङन्तादचि, 'न धातुलोप आर्धधातुके' (1-1-4) इति सूत्रस्य प्रत्याख्यानात् पृथग्यलोपे, यङो लुकि, 'आतो लोप इटि च' (6-4-64) इत्याकारलोपे च रूपम् ।